हर्यष्टकम्

स्वमुद्धर्तुं हरे वेत्ति किं कूपे पतितः पशुः ।
क्षिपन्नङ्घ्रिं मुहुः क्रन्दन् कृपां जनयति प्रभो ॥ १॥

अनिच्छतोऽपि तस्याङ्गस्याङ्गं कुक्षिं च दामभिः ।
शनैर्निबद्ध्य स्वजनैर्हरे स परमुद्धरेत् ॥ २॥

स हरे लालयेत् पङ्कं क्षालयेत् पालयेत् तृणैः ।
शमयेदौषधैर्मन्त्रैः स्वगोष्ठस्थस्य वेदनाम् ॥ ३॥

तथा नरपशोरीश भवकूपेऽर्दितस्य मे ।
हरे परिहराशेषक्लेशं केशिघ्न केशव ॥ ४॥

मां हि जीवन्मृतं कर्तुं यतन्ते परितः खलाः ।
तान्निहत्य हरे शीघ्रं सेवायां ते नियुङ्क्ष्व माम् ॥ ५॥

कामाद्यान्तरशत्रुभ्यो बाह्यशत्रुभ्य एव च ।
भीतं हरेऽसुराङ्गित प्रह्लादाह्लाद पाहि माम् ॥ ६॥

आधीन्वाधीन्नरीन्राज्ञो द्रोहिणोऽन्यांश्च दुर्जनान् ।
क्षिप्रं नाशय सर्वज्ञ सर्वशक्ते हरे मम ॥ ७॥

कलिं खण्डय तद्भृत्यां दण्डयाशु हरे मम ।
मनश्शोधय सत्तत्त्वं बोधयेष्टं प्रसादय ॥ ८॥

वादिराजयतिप्रोक्तमेवं हर्यष्टकं नवम् ।
पठन्नृसिंहकृपया रिपून् संहरति क्षणात् ॥ ९॥

इति श्रीमद्वादिराजपूज्यचरणविरचितम्

हर्यष्टकं सम्पूर्णम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु